गच्छ तत्र परं तत्त्वं मम वेत्स्यसि निष्कलं ॥

प्रत्यक्षतां गमिष्यामि तत्रैव श्रुतिभि[:] स्तुता ।
तच्च संपादयिष्यामि तवाभिलषितं च यत् ॥

तच्छ्रुत्वा भगवान्व्यासो ब्रह्मलोकं तदा ययौ ।
वेदान्प्रणम्य पप्रच्छ किं ब्रह्म परमव्ययं ॥

ऋषेस्तद्वचनं श्रुत्वा विनयावनतस्य वै ।
वेदाः प्रत्येकतः प्राहुस्तल्लक्षणान्मुनिपुंगवं ॥

ऋग्वेद उवाच ॥

यदन्तःस्थानि भूतानि यतः सर्वं प्रवर्तते ।
यदाहुस्तत्परं तत्त्वं साद्या भगवती स्वयं ॥

यजुरुवाच ॥

या यज्ञैरखिलाधीशा योगेन च समिज्यते ।
यतः प्रमाणं हि वयं सैका भगवती स्वयं ॥

सामोवाच ॥

ययेदं भ्राम्यते विश्वं योगिभिर्या विचिन्यते ।
यद्भासा भासते विश्वं सैका दुर्गा जगन्मयी ॥

अथर्वोवाच ॥

यां प्रपश्यंति देवेशीं भक्त्यानुग्राहिणो जनाः ।
तामाहुः परमं ब्रह्म दुर्गां भगवतीं मुने ॥

सूत उवाच ॥

श्रुतीरितं निशम्येत्थं व्यासः सत्यवतीसुतः ।
दुर्गां भगवतीं मेने परं ब्रह्मेति निश्चितं ॥

श्रुतयस्त्वेवमुक्त्वा सा:(र. ता) पुनरूचुर्महामुनिं ।
प्रत्यक्षं दर्शयिष्यामो यथास्माभिरुदाहृतं ॥

इत्येवमुक्त्वा श्रुतयस्तुष्टुवुः परमेश्वरीं ।
सर्वदेवमयीं शुद्धां सच्चिदानन्दविग्रहां ॥

श्रुतय ऊचुः ॥

दुर्गे विश्वमयि प्रसीद परमे सृष्ट्यादिकार्यत्रये
ब्रह्माद्यान्पुरुषत्रयान्त्रिजगुणैस्त्वं खेळया कल्पिता ।
नो ते कोऽपि च कल्पको ऽत्र भुवने विद्येत मातर्यतः
कः शक्तः परिवर्णितुं तव गुणान् लोके भवेद्दुर्गमं ॥

त्वामाराध्य हरिर्निहत्य समरे दैत्यान्रणे दुर्जयान्
त्रैलोक्यं परिपाति शस्तुरपि ते धृत्वा पदं रक्षसि ।
त्रैलोक्यक्षयकारकं समपिबस्तत्कालकूटं विषं
किं ते वाचयितुं वयं त्रिजगतां ब्रूमः परेशयिके ॥

या पुंसः परमस्य देहिन इह स्त्रीयैर्गुणैर्मायया
देहाख्यापि चिदात्मिकापि च परस्यन्दादिशक्तिः परा ।
तन्मायापरिमोहितास्तनुभृतो यामेव देहस्थितां
भेदज्ञानवशाद्वदन्ति पुरुषं तस्यै नमस्ते ऽम्बिके ॥

स्त्रीपुंस्त्वप्रमुखैरुपाधिनिचयैर्हीनं परं ब्रह्म यत्
त्वत्तो या प्रथमं बभूव जगतां सृष्टौ सिसृक्षा स्वयं ।
सा शक्तिः परतो ऽपि यच्च समभून्मूर्तिद्वयं शक्तितस्
त्वन्मायामयमेव तेन हि परं ब्रह्मापि शक्त्यात्मकं ॥

तोयोत्थं करकादिकं जलमयं दृष्ट्वा तथा निश्चयस्
तोयत्वेन भवेद्यथो मतिमतां तथ्यं तथैव ध्रुवं ।
ब्रह्मोत्थं सकलं विलोक्य मनसा शक्त्यात्मकं ब्रह्म त-
च्छक्तित्वेन विनिश्चितः पुरुषधीः पारम्परा ब्रह्मणि ॥

षट्चक्रेषु लयन्ति ये तनुभृतां ब्रह्मादयः षट् शिवास्
ते प्रेता भवदाश्रयाच्च परमेशत्वं समायान्ति हि ।
तस्मादीश्वरता शिवेन हि शिवे त्वय्येव विश्वाम्बिके
त्वं देवि त्रिदशैकवन्दितपदे दुर्गे प्रसीदस्व नः ॥

इत्येवं स्तुतिवाक्यैस्तु श्रुतिभिः संस्तुता सती ।
स्वरूपं दर्शयामास जगदाद्या सनातनी ॥

ज्योतीरूपा हि या देवी सर्वप्राणिष्ववस्थिता ।
व्यासस्य संशयं छेत्तुं स्वतन्त्राकृतिमादधे ॥

स्फुरत्सूर्यसहस्राभां चन्द्रकोटिसमद्युतिं ।
सहस्रबाहुभिर्युक्तां दिव्यास्त्रैरतिशोभितैः ॥

सिंहपृष्ठसमारूढां कदाचित् शतवाहनां(!) ।
चतुर्भिर्बाहुभिर्युक्तां नवीनजलदप्रभां ॥

द्विभुजां च चतुर्हस्तां तथा दशभुजां क्वचित् ।
अष्टादशभुजां क्वापि शतसंख्यभुजां तथा ॥

अनन्तबाहुभिर्युक्तां दिव्यरूपधरां क्वचित् ।
कदाचिद्विष्णुरूपां च वामस्थां कमलासनां ॥

राधया सहितां कस्मात् कदाचित्कृष्णरूपिणीं ।
वामाङ्गाधिगतां वाणीं कदाचिद् ब्रह्मवादिनीं ॥

सूत उवाच ॥

स्वरूपाणि समालोक्य पराशरसुतो मुनिः ।
तां ज्ञात्वा परमं ब्रह्म जीवन्मुक्तो बभूव ह ॥

ततो भगवती देवी ज्ञात्वा तस्याभिवाञ्छितं ।
स्वपादतलसंलग्नं पङ्कजं समदर्शयत् ॥

Digitized by Microsoft ®

मुनिस्तस्य सहस्रेषु दलेषु परमाक्षरं ।
महाभागवतं नाम पुराणं समलोकयत् ॥

प्रणम्य शिरसा देवीं नानास्तुतिभिरादरात् ।
जगाम स्वाश्रमं भूयः कृतकृत्यः स्वयं द्विजाः ॥

यद्यावत्पङ्कजं दृष्टं पुराणं परमाक्षरं ।
महाभागवतं पुण्यं प्रकाशमकरोन्नृणां ॥

स्नेहात्तु कथितं तेन श्रुतं चाधिगतं मया ।
स्नेहाद्वः कथयिष्यामि गोपनीयं प्रयत्नतः ॥

अश्वमेधसहस्राणि वाजपेयशतानि च ।
महाभागवतस्यास्य कलां नार्हन्ति षोडशीं ॥

एवं महाभागवतं प्रकाशमभवन्निधौ ।
परित्राणाय लोकानां महापातकिनामपि ॥

इति० महाभागवतप्रकाशनं नाम प्रथमोऽध्यायः ॥

The contents of the chapters are only indicated in a few of the colophons. At the end of *adhys.* 16–20 the work is styled श्रीमहाभागवते महापुराणे श्रीभगवतीगीतासूपनिषद्विद्यायां योगशास्त्रे० ॥

Adhys. 70–74 contain the *Gaṅgāmāhātmya*; 75–77, the *Kāmākhyāmāhātmya*; 78, the *Tulasīmāhātmya*; 79, the *Rudrākshamāhātmya*.

It ends: व्यास उवाच ॥

एतावदुक्तं देवेन पृष्टेन मुनिना स्वयं ।
खण्डे ऽस्मिन् जैमिने वाक्यं पुण्यं परमशोभनं ॥

एतद्यः शृणुयान्मर्त्यः पठेद्वा भक्तिसंयुतः ।
सो ऽन्ते निर्वाणमाप्नोति भुक्त्वा भोगान्मनोरथान् ॥

सुगुह्यमेतत्परमं कथितं शूलपाणिना ।
महात्मने मुनीन्द्राय नारदाय महात्मने ॥

यस्य संविद्यते गेहे तमापन्न स्पृशेत्क्वचित् ।
य इदं परमख्यानं श्रावयेद् द्विजसन्निधौ ।
सद्भक्त्या जैमिने तस्य पापं नश्यति तत्क्षणात् ॥

अप्यनेकशतकोटिजन्मान्तरसुसंचितं ।
एतदाकर्ण्य संत्यज्य पापं मोक्षमवाप्नुयात् ॥

इति श्रीमहाभागवते महापुराणे प्रथमखण्डसमाप्तिर्नामाशीतितमोऽध्यायः ॥ to ॥ समाप्तश्चायं प्रथमखण्डः ॥

Cf. Rāj. Mitra, Notices, i., p. 203 (48 *adhy.*); R. Roth, Cat. of Tübingen MSS., p. 15 (80 *adhy.*); Burnouf, *Bhāgav. Pour.*, préf., p. cxl., note, refers to this MS. under its old no. 321, but erroneously takes it to contain the first book of the *Devībhāgavata*.

[H. T. Colebrooke.]

3548.

1918. Foll. 320; size 13¾ in. by 6 in.; clear Devanāgarī writing of 1525 A.D.; 14–16 lines in a page. From fol. 278 to the end many leaves have suffered somewhat from damp and wear.

Matsyapurāṇa.

For an analysis of the work see Aufrecht, Cat. Bodl., no. 95. Several editions of the work have appeared in India.

The MS., which was written by two brothers, *Tripurāri* and *Lakshmīdhara*, begius:

प्रणव(*r.* प्रचंड)तांडवाटोपप्रक्षिप्ताक्षिप्तदिग्गजाः ।
भवंतु विघ्नभंगाय भवस्य भवतां भुजाः ॥ १ ॥

Colophon: संवत् १५८२ वर्षे उत्तरायणगते श्रीसूर्ये ग्रीष्मर्तौ आषाढे मासे शुक्लपक्षे चतुर्थ्यां शनिवासरे मघनक्षत्रे सिद्धिनाम्नि योगे सिंहलग्ने ॥ मिथुनस्थे सूर्यैनक्षत्रे मेषस्थे गुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु ॥ तस्मिन्दिने पुस्तकं लिखितं ॥ आमेटाग्रहाते जो॰ गणपापुत्रज्येत्र(० ष्ठ)पुत्रत्रिपुरारि अपरार्धं लिखितं लघुपुत्रलक्ष्मीधरेण पूर्वार्धं लिखितं पुस्तकं ॥ राणा-श्रीसंग्रामराज्ये महिषपुरवास्तव्ये ॥

[Dr. John Taylor.]

3549.

2032. Foll. 334; size 13¾ in. by 6 in.; fair Devanāgarī writing of 1767 A.D.; 15–18 lines in a page.

Matsyapurāṇa.

Colophon: लिषावितं श्रीसाहाजी श्रीकीर्त्तसींहजी-पुत्रस्य साहाजी श्रीनंदलालजी । चिरंजीवी भाइ श्रीजेत-

Digitized by Microsoft®

सौंयजी तस्य पुत्र श्रीकुवेर श्रीसुषदेवजी चिरंजीव । कल्याणमस्तु । लिखितं भटसुषराम । हरितवंसी(r. हरीतवंशी) ॥ संवत् १८२४ वर्षे आसोजमासे शुक्लपक्षे ५ तिथौ रविवासरे ॥

[GAIKAWAR.]

3550.

1080. Foll. 344; size 13½ in. by 6¾ in.; fair Devanāgarī writing of 1795 A.D.; fifteen lines in a page.

The same work.

This MS. was collated with the Oxford one by Prof. Aufrecht, and found inferior.

[H. T. COLEBROOKE.]

3551, 3552.

406, 407. Foll. 459 (of which foll. 29, 135–145 are wanting; whilst nos. 103 & 355 are double; and fol. 219 is wrongly bound between 226 & 227); size 12½ in. by 6 in.; modern Devanāgarī writing; thirteen lines in a page.

Matsyapurāṇa, in two volumes, with continuous pagination; likewise collated by Prof. Aufrecht.

[H. T. COLEBROOKE.]

3553.

2831. Foll. 420; size 6½ in. by 9 in.; fair, modern Devanāgarī writing (European paper); sixteen lines in a page.

A portion of the *Matsyapurāṇa*, comprising the first 127 (of the 278) *adhyāyas*.

The copyist has left frequent gaps in the text.

[SIR CHARLES WILKINS.]

3554.

2320 b. Foll. 18; size 11¾ in. by 6 in.; clear Devanāgarī writing of 1807 A.D.; seventeen lines in a page.

Prayāgamāhātmya, in 12 *adhyāyas*; ascribed to the *Matsyapurāṇa*.

The writing of the first two pages has been somewhat damaged by the leaves sticking together.

It begins: नारायणं नमस्कृत्य° ॥ सूत उवाच ॥

अ[तः प]रं प्रवक्ष्यामि प्रयागस्योपवर्णनं ।
[मार्कंडेयेन क]थितं यत्पुरा पांडुसूनवे ॥ १ ॥
भारते तु यथा(यदा ed.) वृत्ते प्राप्तराज्ये पृथासुते ।
एतस्मिन्नंतरे राजा कुंतीपुत्रो युधिष्ठिरः ॥ २ ॥
भ्रातृशोकेन संतप्तश्चिंतयन्स पुनः पुनः ।
आसीत्सुयोधनो राजा एकादशचमूपतिः ॥ ३ ॥
अस्मान्संपोह्य बहुशः सर्वे ते निधनं गताः ।
वासुदेवं समाश्रित्य पंच शेषास्तु पांडवाः ॥ ४ ॥
कर्णं भीष्मश्च द्रोणश्च कर्णश्चैव महाबलः ।
सुयोधनश्च राजासौ पुत्रभ्रातृसमावृतः* ॥ ५ ॥
राजानश्चैव निहताः सर्वे ये शूरमानिनः ।
किं नो राज्येन कर्तव्यं किं भोगैर्जीवितेन वा ॥ ६ ॥

Cf. Aufrecht, Cat. Bodl., no. 96. A lithographed edition of the treatise was published at Benares in 1854.

Compared with the corresponding section in the *Purāṇa* itself (ed. *Jīb. Vidy.* 1876, *adhy.* 102 seqq.) this *Māhātmya* will be found to be an enlargement on the original version. Thus, ed. *adhy.* 102 (verses 25) corresponds to MS. *adhy.* 1 (vv. 57); 103 (vv. 19) to 2 (vv. 38); 104 (vv. 22) to 3 (vv. 41); 105 (vv. 56) to 4 (vv. 80); 106 (vv. 21) to 5 (vv. 22); 107 (vv. 1–18) to 6 (vv. 129); 107 (vv. 19–34) to 7 (vv. 49); 108 (vv. 24) scattered over 8 (vv. 75), 9 (vv. 50), 10 (vv. 71); 109 (vv. 19) to 11 (vv. 47).

* हत्वा भीष्मं च द्रोणं च कर्णं चैव महाबलम् ।
दुर्योधनं च राजानं पुत्रभ्रातृसमन्वितम् ॥ ed. *M. Pur.*

Digitized by Microsoft®

It ends:

नारदेन कुमारेण प्रोक्तं पौराणिकं परं ।
इदं प्रयागमाहात्म्यं शृणोति श्रावयेच्च यः ॥ ३४ ॥

प्रयागस्नानजं सर्वं पुण्यं प्राप्नोति भक्तिमान् ।
यज्ञैर्दानैस्तपोभिश्च व्रतैश्च नियमैरपि ॥ ३५ ॥

लभ्यते यत्फलं सम्यक् तदस्य श्रवणाद्भवेत् ।
य एतच्छ्रावयेद्विद्वान् विष्णुभक्तिपरायणः ॥ ३६ ॥

तीर्थाभिगामी धर्मात्मा पूजयेत प्रयत्नवान् ।
वस्त्रालंकरणाद्यैश्च दक्षिणाभिः प्रतोषयेत् ॥ ३७ ॥

तस्मिन्संतोषिते विप्रे प्रपद्यंते मनोरथाः ॥ ३८ ॥

इति श्रीमत्स्यपुराणे प्रयागमाहात्म्ये द्वादशो ऽध्यायः ॥ ०

The MS. was written by one *Rādhākṛishṇa Duveda* (*? Dvivedin*).

[F. Buchannan.]

3555.

2329. Foll. 326; size 11 in. by 5¼ in.; clear, modern Devanāgarī character; ten lines in a page.

Mārkaṇḍeyapurāṇa. [A.]

Like the two other copies, the MS. agrees more with that class of MSS. called the *Maithila* MSS. by the editor of this work in the Bibl. Ind., the Rev. K. M. Banerjea.

It begins: नारायणं नमस्कृत्य ० ॥

तपःस्वाध्यायनिरतं मार्कंडेयं महामुनिं ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥

Adhyāya 136 of the edition is followed in this MS. by the two chapters (here in one) given there in the appendix: इति प्रतिज्ञाय० ॥ — — अष्टादश पुराणानि० ॥ but differing considerably, especially in the latter part; and for the last two *ślokas* it has the following: जैमिनिरुवाच ॥

भारते नाभवद्यन्मे संदेहस्फोटनं द्विजाः ।
तद्भवद्भिः कृतं नैव(मैवं C) कश्चिदन्यं(*r.*०न्यः) करिष्यति ॥
यूयं दीर्घायुषः संतु न रोगाः स्मृतिसंयुताः* ।
सांख्ययोगे तथा चास्तु बुद्धिरव्यभिचारिणी ।
पितृशापकृताद्दुःखाद्(०दोषाद् C) दौर्मनस्यं व्यपैतु वः ॥
एतावदुक्त्वा वचनं स जगाम स्वमाश्रमं ।
चिंतयन्परमोदारं पक्षिणां वाक्यमीरितं ॥
यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुवंति दिव्यैः स्तवैर्
वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो
यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

इति श्रीमार्कंडेयपुराणे जैमिनिपंडं प्रथमं समाप्तं ॥

[Gaikawar.]

3556.

412. Foll. 239; size 12¾ in. by 6 in.; fair, modern Devanāgarī writing; thirteen lines in a page.

The same work. [B.]

The pagination, which omits nos. 130–139, stops altogether after fol. 193.

It begins:

प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययं ।
महादेवं महात्मानं विश्वस्य जगतः पतिं ॥ १ ॥

यद्योगिभिर्भवभयार्तिविनाशयोग्यम् ० ॥ २ ॥

पायात्स वः सकलकल्मषभेददक्षः ० ॥ ३ ॥

नारायणं नमस्कृत्य ० ॥ ४ ॥

पृथिव्यां नैमिषं श्रेष्ठं यत्र योगेश्वरो हरिः ।
स्वयंभूर्देवदेवेशो यत्र सा लिंगधारिणी ॥ ५ ॥

गोमती सरितां श्रेष्ठा यत्र ते मुनयः स्थिताः ।
मार्कंडेयं मुनिश्रेष्ठं जैमिनिः प्रत्यपूजयत् ॥ ६ ॥

तपःस्वाध्यायनिरतं मार्कंडेयं महामुनिं ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥ ७ ॥

प्रष्टुमि[च्छामि] ते ब्रह्मन्संदेहान्भारतादिमान् ।
व्यासेनोक्तान्मुनिश्रेष्ठ संदेहांस्तान्ब्रवीतु(*r.* ब्रवीहि) मे ।
श्रुत्वा तान्मुनिशार्दूल कृतकृत्यो भवाम्यहं ॥ ८ ॥

---

* यूयं दीर्घायुषः संतु प्रजा वृद्धिर्विवित्कृता ॥ B;
यूयं दीर्घायुषस्योचैर्नीरोगा वृत्तिसंयुताः ॥ C.

Digitized by Microsoft ®

श्रवणं ये करिष्यंति तेषां भयभयं कुतः ।
आधिव्याधिविनाशश्च आयुरारोग्यवर्धनं ॥ ९ ॥
वर्धनं धनपुत्राणां तत्पुराणं प्रचक्ष्व मे ।
पठनाच्छ्रवणाच्चैव महापापैः (नरः पापैः C) प्रमुच्यते ॥ १० ॥
भगवन् भारताख्यानं °

It ends in the same way as A, omitting, however, the last verse of that MS.; the colophon being followed by (cf. end of edition):

पुराणस्यास्य संख्या च कथिता तत्त्वबुद्धिना ।
श्लोकानां षट् सहस्राणि तथा चाष्ट शतानि च ॥ १ ॥
श्लोकाश्चात्र नवाशीति एकादशसमाहिताः ।
कथितं मुनिना तेन मार्कंडेयेन धीमता ॥ २ ॥
पुरा पवित्रा पुण्या च समाप्ता सह संहिता ॥

This is followed by an *anukramaṇikā*: मार्कंडेय-जैमिनिसंवादः । अप्सरसः शापः । कंकवधः । ° — — दमचरितमिति समाप्तं चेदं मार्कंडेयपुराणं ॥

[H. T. COLEBROOKE.]

3557.

932. Foll. 213; size 12¼ in. by 6 in.; good, clear Devanāgari writing of 1793 A.D.; twelve lines in a page.

Mārkaṇḍeyapurāṇa.

It begins: यज्ञोगिभिर्भेवभयार्तिविनाशयोग्यम् ° ॥ पायात्स वः सकलकल्मषभेददक्षः ° ॥ तपःस्वाध्यायनिरतो (!) ° ॥ प्रष्टुमिच्छामि ते ब्रह्मन् ° ब्रवीमि तु मे (!) । श्रुत्वा तान्मुनिशार्दूल कृतकृत्यो भवामहे (!) ॥ ° as B.

It ends as A, but omitting the final (*śārdūlavikrīḍita*) verse.

Fol. 1*a* has the following note by Colebrooke:—

"The holy *Márcandéya* (son of *Mŕicanda*) will live through twenty-four ages of *Brahmá*. See the story in the *Bhágavata*; his life was originally limited to six years, but grants of larger periods of life (were) made in consequence of successive acts of austere devotion. Seven others are acknowledged to be long-lived:—*Aśvattháman* (son of *Droṇa*), *Bali*, *Vyása*, *Henumat*, *Vibhíshaṇa*, *Crípáchárya*, and *Paraśuráma*."

[H. T. COLEBROOKE.]

3558.

2258. Foll. 8 & 66; size 7¼ in. by 4 in.; clear Devanāgarī writing of 1775 A.D.; 6–8 lines in a page.

Devīmāhātmya, a section of the *Mārkaṇḍeya-purāṇa*, viz. *adhyāyas* 81–93 in the Bibl. Ind. edition, but here divided into 12 chapters.

The work is preceded, on the first 8 leaves, by the usual devotional tracts—the *Devyāḥ Kavacam*, the *Argalāstotram*, and the *Kīlakam*—here consisting together of 93 verses, which thus raise the extent of the chief work (consisting in the edition of 572, here of 630 *ślokas*) to somewhere about 700 verses, whence the work is also called *Saptaśatī*.

The copyist's signature runs thus:

संवत् १८३२ ॥ लिखितमिदं पुस्तकं शंभूनाथमिश्रेण जुरावरसिंहस्य पाठार्थं ॥ फाल्गुणमासे शुक्ले चतुर्थ्यां ४ भृगुवासरे ॥

As one of the most favourite *Śaiva* text-books, this work has been frequently published in this form in India.

On the margin of the first few pages of the principal work, some notes from *Nāgojībhaṭṭa's* commentary have been added.

[R. JOHNSON.]

3559.

2415. Foll. 14 & 84 (counted 85, no. 66 having been omitted); size 8 in. by 4 in.; Devanāgarī writing of 1776 A.D.; six lines in a page.

Devīmāhātmya, with the introductory tracts.

[R. JOHNSON.]

3560.

2240. Foll. 218; size 3 in. by 2¼ in.; modern Devanāgarī writing; six lines in a page.

Devīmāhātmya, with introduction.

[R. JOHNSON.]

Digitized by Microsoft ®

3561.

3234. Foll. 76 (paged 1–152); size 4¼ in. by 3½ in.; neatly written, in Devanāgarī, by *Lāl Mahatāb Rāy;* ten lines in a page; bound in Russia leather, with a clasp.

Devīmāhātmya, with the introductory tracts; written in half-*śloka* lines.

It ends: इति फाल्गुने मासे शुक्लपक्षे द्वादश्यां तिथौ कलकत्तायां श्रीदुर्गादेवीपुस्तकं चंडीपाठसंज्ञं लालामहतावरायेन लिखितम् । ०

[Sir Charles Wilkins.]

3562.

2247. Foll. 153 (counted 154, no. 27 being passed over); size 4¼ in. by 2½ in.; modern Devanāgarī writing; six lines in a page.

Devīmāhātmya, with the introductory tracts, slightly increased by a few more meditations.

[R. Johnson.]

3563.

3214. Foll. 245 (the first 10 of which are wanting); size 2⅞ in. by 2⅝ in.; modern Devanāgarī writing; six lines in a page.

Devīmāhātmya, with the introduction, the first, and larger, portion of which is, however, wanting. [R. Johnson.]

3564.

3237. Foll. 93; stiff Indian paper, size 6½ in. by 4 in.; modern, indifferent Devanāgarī handwriting; six lines in a page.

Devīmāhātmya, without introduction.

It ends: ज्येष्ठमासे कृष्णपक्षे अष्टम्यां गुरुवासरे विजैपुरकालीकावस्थाने लिखितं बृहस्पतिब्राह्मणेन श्रीशाके १७१॥

[?]

3565.

1067. Foll. 91; size 6 in. by 3½ in.; Devanāgarī writing of 1802 A.D.; seven lines in a page.

Devīmāhātmya, without the introductory tracts.

Colophon: संवत् १८५९ ॥ . . . इदं पुस्तकं लिष्यते भवानीप्रसाद कायस्थं ठेकाना कासीमध्ये मुकाम मिरजापुर ॥

[H. T. Colebrooke.]

3566.

2926. Foll. 41; size 12¼ in. by 5 in.; Nepalese writing of 1757 A.D.; thirteen lines in a page.

Durgāṭīkā, a commentary on the *Devīmāhātmya* (without the introductory tracts), by *Jagaddhara*—son of *Ratnadhara* and *Damayantikā*—a descendant of *Caṇḍeśvara.*

The copyist seems to have had before him a MS. with some lacunæ on the first few pages. It begins (cf. Rāj. Mitra, Notices, vii., p. 164): ओं नमश्चण्डिकायै ॥

प्रचण्डचण्डमुण्डादिमुण्डखण्डनपण्डिता ।
चण्डिका पातु पाखण्डखण्डिकोद्दण्डमण्डिता (पाषाण०
[R. M.) ॥

उप्पभे[दादिकान्] कोषान्वीक्ष्य पाणिनिसंमतं (?. ०ता)।
श्रीजगद्धरधीरेण दुर्गाटीका विधीयते ॥

पुराणवाणीयमभाषि [पुण्या]
[ध]न्येन मान्येन मुनीश्वरेण ।
ममाल्पकस्यात्र परिश्रमेण
वर्णव्यवस्था कियती यदि स्यात् ॥

इह कि[ल च]तुर्दशमन्वन्तराणि मार्कण्डेयपुराणोक्तानि (*M. P.* 53, 6 seqq.) ।

स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा ।
[औ]त्तमिस्तापसश्चैव रैवतश्चाक्षुषस्तथा ॥

षडेते मनवो ऽतीता अस्य वैवस्वतो मनुः ।
सावर्णीः पञ्च रौच्यश्च भौत्याश्च गमिनस्त्वमी ॥

Digitized by Microsoft®

इति हि तानि तत्र सावर्णेनामकाष्टममन्वन्तराधिपस्य मनोर्जन्मकथनप्रस्तावे देवीमाहात्म्यं मार्कण्डेयमुनिः स्वशिष्याय क्रोष्टुकिने(क्रौ०) प्राह स्म॥ मृकण्डस्यापत्यं मार्कण्डेयः। मृकण्डशब्दात्तस्यापत्यमित्यर्थे स्त्रीभ्यो ढगित्यनुवृत्तौ भृग्वादिभ्यश्चेति (*P.* iv., 1, 120–123) ढक्॥ सावर्णिरित्यादि। °

The writing of the last page is partly effaced by wear. It ends: तद्वरप्रतिपादनेन सर्वफलेषु भगवत्याः प्रसन्नाया दानसामर्थ्यमाविष्कृतमिति सर्वं रमणीयमिति॥ ७३॥

विद्याच्छत्रं कुलच्छत्रं धारितं येन धीमता।
मीमांसकः सुरगणे सो ऽभूच्चण्डेश्वरः कविः॥

तद्वंशजेन महनीयनयेन नाना-
विद्याविनोददयितेन जगद्धरेण।
टीकेयमा[ट]रचता व्यरचि प्रयत्नाद्
आलोकयन्तु कृपया गुणिनो ममैनाम्॥

रत्नं रत्नधरो यमाप गुणिनामाद्यो ऽनवद्यः सतां
भुङ्क्ते [यं] ह[म]यन्तिकापि(. . . मदयन्तिकापि [R.M.]) सुषुवे नैयायिकं सुतं।
तस्यानूनजगद्धरस्य कवितुष्टीयमु[ञ्जृ]म्भतां(*r.* °रेण [कविना टीकेय° R.M.)
तत्तद्वर्णविवर्णनैककुशला स्वल्पाक्षरार्थाधिका॥

अष्टादशव्याकरणं पुराणं(*r.* °व्याकरणप्रवीण-)
मुनी[न्द्र]पाराशरिनिर्मितस्य।
ग्रन्थस्य किंचिद्विवृ[तिमे]मात्र(काचि° R.M.)
स्वल्पस्य हासाय खलस्य नास्तु(हास्यस्य कदापि [मास्तु R.M.])॥

इति श्रीमहामहोपाध्यायश्रीजगद्धरकृता टिप्पनी समाप्ता॥ संवत् ६७७॥ ° [B. H. Hodgson.]

3567.

88. Foll. 69; size 10½ in. by 4¾ in.; good, modern Devanāgarī writing; 6–14 lines in a page.

Devīmāhātmya, without the introductory tracts; with a commentary, *Saptaśatīvyākhyāna*, by *Nāgojībhaṭṭa*, son of *Śivabhaṭṭa* and *Satī*. [A.]

It begins: मार्कण्डेय उवाच॥

सावर्णिः सूर्यतनयो यो मनुः कथ्यते ऽष्टमः।
निशामय तदुत्पत्तिं विस्तराद्गदतो मम॥ १॥

सावर्णिरिति॥ सवर्णायाश्छायाया अपत्यं सावर्णिः। वाह्वादित्वादिञ्। विस्तराद्गदतो ममेति अपादानस्य ज्ञेयत्वविवक्षया (° क्षार्थां B) षष्ठीति निशामय जानीहि चुरादेः रूपं तस्य नान्ये मितो हेताविति मिच्चनिषेधः॥ °

The commentary ends: ऊत्ये मनुरित्यनेन सावर्णिरित्यारभ्य सावर्णिभेविता मनुरित्यंतो ऽयं महामलामंत्र इति सूचयतीति (here ends the Agra edition of 1870)। तदुक्तं लक्ष्मीतंत्रे। सम्यग् हृदि स्थिता सेयं जन्मकर्मावलिः स्तुतिः। एतद् द्विजमुखाज्ज्ञात्वा अधीयानो नरः सदा॥ विभूय निखिलां मायां सम्यग्ज्ञानं समश्नुते। सर्वां संपद आप्नोति सकलापदरतीति(!) सर्वेष्टसिद्धिः॥ इति शिवभट्टसुतसतीगर्भेजनागोजीभट्टकृते सप्तशतीव्याख्याने त्रयोदशो ऽध्यायः॥

This commentary has been repeatedly printed in India. [H. T. Colebrooke.]

3568.

1588b. Foll. 49; size 9½ in. by 4¾ in.; fair Devanāgarī writing of 1798 A.D.; eleven lines in a page.

The same commentary, without the text; but including the annotations on the preliminary devotional tracts; and a supplementary section at the end.

It begins: मार्कंडेयेन क्रोष्टुकिं(क्रौ०) भागुरिं प्रति उक्तं स्तोत्रं जैमिनिं प्रति पक्षिरूपैर्मुनिपुत्रैरुक्तं मार्कंडेयपुराणे। तद्यथामति व्याचक्ष्महे॥ तत्रादौ व्याख्यास्यमानस्तोत्रे स्तूयमानदेवतास्वरूपं प्राधानिकरहस्याख्ये ग्रंथविशेषे उक्तं विविच्य दृश्यते। तत्रादौ राज्ञः प्रश्नः।

भगवन्नवतारा ये चंडिकायास्त्वयोदिताः।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि॥ इति °

The commentary on the *Devīmāhātmya* proper begins on fol. 5*b*; and it ends on 44*a*: महामलामंत्र इति सूचयतीति सर्वेष्टसिद्धिः॥ इति कालोपनामकभट्टसुतसतीगर्भेजनागोजीभट्टकृते सप्तशतीव्याख्याने त्रयोदशो ऽध्यायः॥

The remaining six leaves contain annotated extracts from *Tantras* connected with the worship of the *Devī*, and the reading of the

Digitized by Microsoft®

Devīmāhātmya, beginning: अथास्य सप्तशतीत्वव्यवहारप्रयोजकसप्तशतीहोममंत्रविभागो दर्शितः कात्यायनीतंत्रे । मार्कंडेयस्त्रृषिप्रोक्ताः प्रथमश्लोकतः प्रिये । व्योमादिवर्णसंभूतो द्वितीयस्वरसंयुतः ॥ व्योम हकारस्तस्यादिः सकारः द्वितीयः स्वर आकार इत्यर्थः । नृपं तं प्रवदेन्मंत्राः सर्वे चाष्टदश १८ प्रिये । °

Besides this extract (*paṭalas* 20–23), and another (fol. 48*b*) from the *Kātyāyanītantra*, there are others from the *Vārāhītantra* (foll. 46*b*, 48*b*), the *Smaśālayatantra* (? *Śmaśānālayatantra*) and the *Haragaurītantra* (fol. 48*a*).

It ends: क्रोडतंत्रे । प्रत्येकावर्तनं देवि ह्यमेधेन संस्मितं (संमितं) । त्रिरावृत्त्या लभेत्कामान् पंचावृत्त्या रिपुं जयेदिति सर्वप्रसिद्धिः कात्यायन(? ° नीं) विद्महे कन्याकुमारि (*r.* कन्यां कुमारिकां) धीमहि तन्नो दुर्गा प्रचोदयादित्येतन्नायत्री यजुर्वेदे ॥ इति श्रीमदुपाध्यायोपनामकशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते चंडीस्तोत्रव्याख्यानं समाप्तिमगमत् ॥ संवत् १८५५ ॥

[H. T. Colebrooke.]

3569.

824. Foll. 60; size 12¼ in. by 4¾ in.; good Devanāgarī writing of 1798 A.D.; 9–13 lines in a page.

Devīmāhātmya (without the preliminary tracts), with a commentary, *Saptaśatīṭīkā* (? *Saptaśatīsetu*), composed by *Raghunātha Maskarin*, or *Raghunāthāśrama*, for his pupil *Gaṅgā Dvivedin*.

It begins:

शंके ऽहं तव धाम वामन विभो पृथ्वी भवेद्वा कथं
किं वा तत्र तवैव शक्तिरपरा संसूचितैव त्वया ।
सा किं तेन भवेद् द्वितीयधरणीसंपादने वाक्षमा
तस्माद्याचनवंचना तव विभो भृत्यस्य नैवोचिता ॥ १ ॥

प्रसमीक्ष्य पुरातनप्रयुक्ताः
सुचिरं चेतसि योजनाः स्वबुद्ध्या ।
स्वजनस्य सुखाय सप्तशत्या
रघुनाथाश्रम आतनोति टीकां ॥ २ ॥

सर्वंध्यगाधे रघुनाथनाम्ना
व्याख्यानरूपो रचितो ऽत्र सेतुः ।
सखंडितः सप्तशतीसमुद्रे
गतागतं साधन(*r.* साधु)जनस्तनोतु ॥ ३ ॥

उद्देशितो विशेषेण यतिरंतेनिवासिनः ।
कौतुकात्कुरुते टीकां मुदे गंगाद्विवेदिनः ॥ ४ ॥

पूर्वं किल भगवद्बादरायणशिष्यो जैमिनिर्महाभारतविषये केषुचित्पदार्थेषु संदिहानो मार्कंडेयं महामुनिमुपगम्योक्तवान् । हे मुने मदीयान् संदेहानपकुर्विति । °

At the end of the second chapter (fol. 17*b*) we read:

देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः ।
यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि ॥

देव्या गणैश्च तथा युद्धं कृतं यथा दिवि देवा एषां तुष्टुवुः परितुष्टा बभूवुः(!) । अथवा । एषां युद्धं प्रशशंसुः कर्मेवाणि (? कर्मेणि वा) षष्ठी ॥ इति भगवत्प्रीत्यै केनचित्कृतायां टीकायां महिषासुरसैन्यवधः समाप्तः ॥

It ends:

मन्ये विघ्नसृजो नमंति बलिनस्त्वामेव सर्वे ऽवशास्
तस्मात्त्वं सकलाश्रयो ऽसि भगवन् धर्ता धरण्यास्तु यः ।
मिथ्या भाति धने वचो मम विलोभनैर्निजस्येत्यदः(?)
क्षीये ऽहं तव पादभागपि यतः संसारसिंधो(° धौ) वृथा
संसारः परमांबुडिं(? ° धौ) प्रतिदिनं तारुण्यमालंबते [॥ १ ॥
तस्मिन्मज्जति मूढधीः प्रतिदिनं प्राप्यापि ते रूपतां ।
तस्योच्छेदकरं तवांघ्रियुगलं केनापि न स्मार्यते (स्मर्यते)
तस्मान्मोहकधुर्यतां (?) त्वयि परं शंके निरावलनं(° लंबनं)
[॥ २ ॥
नानादिग्वसुपूरितां शिखलीं(?) ख्यातां पयोधेः[:] परं
क्षित्यां शासति दुर्जनाय भयशेषाय संपत्प्रदे ।
विख्यातोभयचंद्रवंशतिलके नारायणे क्ष्मापतौ
टीकेयं रघुनाथमस्करिकृता यायात्समाप्तेः फलं ॥ ३ ॥

सप्तशतीटीका समाप्तिमगात् ॥ संवत् १८५५ वैशाखकृष्णत्रयोदश्यां भृगुवासरे लिखिता काश्यां मध्ये विश्वेश्वरसमीपे गंगातटे ॥ [?]

3570, 3571.

555, 170. Foll. 382 & 350; size 12¼ in. by 5¾ in.; fair Devanāgarī writing of 1805 A.D.; 12 or 13 lines in a page.

Digitized by Microsoft ®

Maudgalapurāṇa, or *Mudgalapurāṇa*, called 'the final *Purāṇa* (*āntyapurāṇa*)' in the colophons; being intended to supersede all the others, and to dispose of the doubts left there as to which is the supreme deity, by establishing the claims of *Gaṇeśa* to that position.

It begins: अथ मौद्गलपुराणारंभः ।

ध्यायेत्स्थिरेण चित्तेन(मनसा B) गणेशं सर्वसिद्धिदं ।
बुद्धिप्रकाशकं पूर्णं योगिनां हृदि संस्थितं ॥ १ ॥
जितं तेनाखिलं नानाब्रह्मवर्णैनवर्णितं ।
नानाजगत्समूहं वै गणेशेनोभयं(?°नाभयं) कृतं ॥ २ ॥
भक्तसंरक्षणार्थाय निर्गुणः सगुणस्तु यः(सः B) ।
नानावतारवान्सो ऽपि नानाभेदधरो बभौ ॥ ३ ॥
तस्मै नमो गणेशाय नरकुंजररूपिणे ।
सगुणे नररूपाय निर्गुणे गजवक्त्रिणे ॥ ४ ॥
नमः शिवाय शांताय विष्णवे प्रभविष्णवे ।
सूर्याय शक्तये चैव चतुर्धा ते विभागिने ॥ ५ ॥
ब्रह्माणं शेषनागं च नरं नारायणं सदा ।
नमामि भावयुक्तो ऽहं पुराणं पुरुषं परं ॥ ६ ॥
देवानां योगिनां चैव महर्षीणां महात्मनां(च सर्वदा B) ।
व्रजामि शरणं नित्यं पुराणज्ञानसिद्धये(पुराणं° B) ॥ ७ ॥
पुराकल्पे ऽभवन्विप्राः(च मुनयः B) शौनकाद्याः ससा-
[धनाः(स्थिता भवन् B) ।
कलिदोषभयात्सर्वे नैमिषारण्यमाश्रिताः(°ण्यके सदा B)
तत्र कलियुगावासं ज्ञात्वादौ ब्रह्मणो मुखात् । [॥ ८ ॥
मुनिधर्मप्रसिद्ध्यर्थं कर्मज्ञानप्रसिद्धये ॥ ९ ॥
अन्यच्च ब्रह्मणा प्रोक्तं पुराणश्रवणं सदा ।
कलिमलहरं पुण्यं तदर्थमभवन् यतः(तदर्थं लालसा
[भवन् B) ॥ १० ॥
कस्मिंश्चित्समये सूतो लोमहर्षण आययौ ।
मुनीनां दर्शनार्थाय पुराणज्ञो विचक्षणः ॥ ११ ॥
नैमिषारण्यशोभां च पश्यंस्तत्र सुविस्मितः ।
अहो धन्यं महारण्यं कलिदोषविवर्जितं ॥ १२ ॥
दृष्ट्वा वै मुनयस्तेन सुप्रसन्नाननांबुजाः ।
नित्यनैमित्तिकर्तारः स्वधर्माचरणप्रियाः ॥ १३ ॥
पंचयज्ञरतास्तत्र वेदाध्ययनकारिणः ।
ब्रह्मतेजःसमायुक्ता ज्वलंतः पावका इव ॥ १४ ॥
विनास्तेन यथा सूर्या योगिनो वेदवादिनः(°वेदिनः B) ।
तारकाः सर्वज्ञतूनां शौनकाद्या महर्षयः ॥ १५ ॥
तत्रागत्य महाभागः स सूतो लोमहर्षणः ।
साष्टांगेन ततः पूर्वं(प्रणमितो B) परमाह्लादसंयुतः ॥ १६ ॥
अभिवाद्य मुनीन्सर्वान् भक्त्या नम्रात्मकंधरः ।
प्रांजलिः प्रयतो भूत्वा प्रोवाच मधुरं वचः ॥ १७ ॥

सूत उवाच ॥

वंशो धन्यो मदीयोऽद्य पितरौ च कुलं वयः(?कुलान्वयः) ।
विद्या व्रतं तपो ज्ञानं धन्यं सर्वं मुनीश्वराः ॥ १८ ॥
भवतां पादपद्मं च सर्वाशुभविनाशनं ।
लक्षितं यत्सदा देवैर्मया दृष्टं सुपुण्यतः ॥ १९ ॥
साक्षाद्ब्रह्मस्वरूपा वै ब्राह्मणा(ब्रह्मण्य B) ब्रह्मविक्षमाः ।
तेषां दर्शनमात्रेण कृतकृत्याश्च जंतवः ॥ २० ॥
कृतार्थो ऽहं कृतार्थो ऽहं कृतार्थो ऽहं न संशयः ।
भवतां दर्शनेनैव मुक्तो ऽहं भवसागरात् ॥ २१ ॥
इति ब्रुवंतं साधुं ते सूतं तं रोमहर्षणं ।
प्रत्यूचुर्ब्राह्मणाः सर्वे भक्तियुक्तं तपोधनाः ॥ २२ ॥

ब्राह्मणा ऊचुः ॥

सूत सूत महाभाग स्थीयतां पुण्यवर्धन ।
तव दर्शनमात्रेण संतुष्टाः स्मो वयं खलु ॥ २३ ॥
इत्युक्तः स सूतस्तत्र मुनिदत्ते शुभासने ।
समासीनो महाबुद्धिः सांजलिः(?प्रा°)सन्प्रतापवान् ॥ २४ ॥
सुखासीनं च सूतं तं दृष्ट्वा तत्र महामुनिः ।
भृगुप्रवरमुख्यो ऽसौ(वै B) मुनीनां प्रत्युवाच ह ॥ २५ ॥

शौनक उवाच ॥

सूत सूत महाभाग सर्वज्ञ सुखदायक ।
त्वया ह्याराधितः प्राज्ञः कृष्णद्वैपायनो महान् ॥ २६ ॥
नारायणावतारश्च साक्षान्नारायणः स्वयं ।
वेदविभागकारी स पुराणानां विभागकृत् ॥ २७ ॥
त्वं वै तस्मात्पुराणानि सेतिहासानि वेत्सि च ।
तेन सर्वज्ञता जाता तवापि पुण्यवर्धन ॥ २८ ॥
वयं भीताश्च कालेन कलिकालपरूपिणा ।
नैमिषारण्यमास्थाय स्थिता ह्यमाः स्वयंभुवा ॥ २९ ॥
तत्र विश्रांतिदाता वै त्वं प्राप्तो ऽसि महामुनिः ।
पुराणानां प्रवक्ता च पुण्यवान् पुण्यवर्धन ॥ ३० ॥
यत्र पौराणिकी गाथा कलिस्तत्र न तिष्ठति ।
तस्मात्कारुण्यभावेन पुराणं ब्रूहि नो भो ॥ ३१ ॥

Digitized by Microsoft ®

तव यद्दर्शनं जातं महापुण्येन सत्तम ।
धन्यं धन्यं(धन्य धन्य B) भहाभाग साक्षात्संशयच्छित्स्वयं
छेदेन संशयानां वै सतां त्वं रोमहर्षेण । [॥ ३२ ॥
करोषि तेन ते नाम रोमहर्षेण इत्यहो ॥ ३३ ॥
इति पृष्टो महात्मा स शौनकेन महर्षिणा ।
संहृष्टः सत्तुवाचेदं वचनं धर्मसंकृतं(०संस्तुतं B) ॥ ३४ ॥
सूत उवाच ॥
अद्याहं कृतकृत्यो भो कृत्वानुग्रहकारिणा ।
सकलं कथयिष्यामि व्यासेन कथितं महत्(च यत् B)॥३५॥
इत्युक्त्वा कथयामास पुराणानि स कृत्स्नशः ।
नानाख्यानविभक्तानि नानाधर्मयुतानि च ॥ ३६ ॥
सर्वार्थसाधनानि च दुःखनाशकराणि च ।
ब्रह्मभूतप्रदानि वै नानामतयुतानि च ॥ ३७ ॥
पुराणोपपुराणानि सेतिहासानि भागशः ।
धर्मार्थकाममोक्षाणां प्रदानि पुण्यदानि च ॥ ३८ ॥
श्रुत्वा श्रुत्वा मुनिजना हर्षयुक्ता बभूविरे ।
नित्यं प्रमुदितास्तेन प्रीताः संपूर्णभावतः ॥ ३९ ॥
युगस्योत्क्रमणं तस्य(कलियुगस्योत्क्रमणं B) चक्रुस्ते
[मुनयो ऽखिलाः ।
पुराणश्रवणेनैव परमाह्लादसंयुताः ॥ ४० ॥
पुराणेषु च सर्वेषु सेतिहासेषु सर्वतः ।
नानाभेदमतादीनां श्रुत्वा भ्रांता मुनीश्वराः ॥ ४१ ॥
निश्चयं नाधिगच्छंति परं किं सर्वसंमतं ।
तदर्थं मुनिवर्यैः स्म पर्यपृच्छत्स शौनकः(शौ० पर्य-
शौनक उवाच ॥ [पृच्छत B) ॥ ४२ ॥
भो भो सूत महाभाग शृणु मे वचनं लघु ।
पुराणानि च संश्रुत्वा(*sic* A, B) भ्रांता जाता(भ्रान्ताः
[स्मो वै B) महाद्युते ॥ ४३ ॥
इदं परमिदं नेति सर्वत्र वर्णितं त्वया ।
भिन्नं भिन्नं महाबुद्धे तेन नो (वै B) निश्चयो भवेत्(०यः
[कथं B) ॥ ४४ ॥
कुत्रापि शंकरः श्रेष्ठः कुत्र विष्णुस्तथा रविः ।
शक्तिश्चैव गणेशश्च कुत्र वैराटरूपकं ॥ ४५ ॥
कुत्र ब्रह्म च योगश्च ज्ञानं कर्म च कुत्र वै ।
आत्मा प्राणो ऽग्निमित्युक्तं मनो वै परतः परं ॥ ४६ ॥
कुत्र बुद्धिर्महाभाग सांख्यं स्वानंद एव च ।
इत्यादिमतभेदेन निश्चयो नैव जायते ॥ ४७ ॥
अतस्त्वं कृपया ब्रूहि वेदशास्त्रार्थसंमतं ।
सर्वेषां मायमेकं च सर्वसंशयनाशनं ॥ ४८ ॥

Sūta then begins to expound the "essence of the *śruti* and *smṛiti*," as revealed by the *muni Mudgala* to *Daksha*, when the latter sought deliverance from the curse of *Rudra*, and consisting in the knowledge of *Gaṇeśa* and the true mode of worshipping him.

The whole work is divided into 9 *khaṇḍas* (vol. i., 1–4; ii., 5–9), each inscribed to a different *avatāra*: viz. I., *Vakratuṇḍacaritra*, 54 *adhy.*, 91 foll.; II., *Ekadantacaritra*, 74 *adhy.*, 117 foll.; III., *Mahodaracaritra*, 51 *adhy.*, 84 foll.; IV., *Gajānanacaritra*, 52 *adhy.*, 90 foll.; V., *Lambodaracaritra*, 45 *adhy.*, 74 foll.; VI., *Vikaṭacaritra*, 45 *adhy.*, 95 foll.; VII., *Vighnarājacaritra*, 16 *adhy.*, 25 foll.; VIII., *Dhūmravarṇacaritra*, 50 *adhy.*, 87 foll.; IX., *Yogacaritra*, a combination of different forms of *Gaṇeśa*, 41 *adhy.*, 60 foll.

It ends: शौनकाद्या ऊचुः ॥
भक्तिं देहि त्वदीयां नो योगं शांतिप्रदायकं ।
यं यमिच्छामहे नाथ तं तं(यद्यदि० तत्तत्) सिध्यतु सर्वदा
गाणपत्यांश्च नः सर्वान्कुरुष्व सर्वदा परान् । [॥ ५० ॥
इमान्वरान् गणाध्यक्ष प्रार्थितान्देव देहि नः ॥ ५१ ॥
तथेति तानथोवाच गणेशो ब्रह्मनायकः ।
व्यासादींश्च जगादासौ वृणुध्वं वांछितान्वरान् ॥ ५२ ॥
तैस्तथैव गणाध्यक्षः प्रार्थितो गणपप्रियैः ।
तथेति तानथोवाच सूतं जगाद विस्मयः ॥ ५३ ॥
वरान् ब्रूहि महाभाग त्वया संश्रावितं परं ।
द्विजेभ्यस्तेन संतुष्टो दास्यामि स तथाब्रवीत् ॥ ५४ ॥
तथेति तमथोक्त्वासौ धूम्रवर्णो गजाननः ।
अंतर्धाय स्वमात्मानं स्वानंदस्थो बभूव ह ॥ ५५ ॥
सर्वे संहृष्टचित्तास्ते स्वस्वस्थानं ययुस्ततः ।
मौद्गलं तत्समाश्रित्य गणेशमभजन्परं ॥ ५६ ॥
इमां मुद्गलजां श्लोकैः संहितां वेदबृंहितां ।
त्रयोविंशतिसाहस्रैः सार्धशतैकसंयुतैः ॥ ५७ ॥
अष्टाविंशत्यधिकैश्चाध्यायैश्चतुःशतैः परैः ।
खंडैश्च नवभिः पूर्णां सर्वसिद्धिमयीं चितां ॥ ५८ ॥
मुद्गलः कथयामास सर्वेषां हितकारणात् ।
शब्दब्रह्मरहस्याख्यां परब्रह्मप्रदायिनीं ॥ ५९ ॥

Digitized by Microsoft®

इति श्रीमदार्ये मौद्गले महापुराणे नवमखंडे योगचरित्रे पुराणसमाप्तिवर्णनं नामैकचत्वारिंशो ऽध्यायः ॥ ४९ ॥ समाप्तो ऽयं ॥ नवमखंडसंख्या २०९३ ॥ ग्रंथसंख्या त्रयोविंशतिसहस्राणि अर्धैकपंचशतानि कानि श्लोकानामिति २३५५० अध्यायाः अष्टाविंशत्यधिकाश्चतुःशतानि ४२८ ॥ संवत् १८६२ मिति पुस(पुष्य)-वदी २ वार आदित्वार ॥

Nine leaves appended at the end contain an index of the *adhyāyas* of the several *Khaṇḍas*. [H. T. Colebrooke.]

3572–3575.

2673–2676. Four vols.; size 9½ in. by 4¾ in.; fairly good Devanāgarī writing of 1751 (or 1811 ?) A.D.

Maudgalapurāṇa, imperfect, wanting all after VI., 19, 88.

Khaṇḍas II. and V. are written in a different hand from the rest.

Vol. I. contains *Khaṇḍa* I. in 223 foll., 8–10 lines.

Vol. II. contains *Khaṇḍa* II. in 122 foll., 13 lines; *Khaṇḍa* III. in 158 foll., 9–11 lines.

Vol. III. contains *Khaṇḍa* IV. in 172 foll., 10 or 11 lines. This vol. is dated as follows: प्रजोत्पत्तीनामसंवत्सर आश्विन(आश्विन) शुद्ध त्रीतीयेतीरवासरे (?तृतीयसौरवासरे) पाथीसारथीसप्तमीथौ हे लिखितं ।

Vol. IV. contains *Khaṇḍa* V. in 86 foll., 13 lines; *Khaṇḍa* VI. in 64 foll., 10 or 11 lines, as far as *adhy.* 19, v. 88.

[Mackenzie Collection.]

3576.

925. Foll. 184 & 63; size 12½ in. by 6½ in.; fair, modern Devanāgarī writing; twelve lines in a page.

Liṅgapurāṇa, in two parts, of 105 and 48 *adhyāyas* respectively.

See Aufrecht, Cat. Bodl., no. 101. Several editions of the work have been published in India. [H. T. Colebrooke.]

3577.

1917 B. Foll. 89 (numbered 145–233); size 14½ in. by 5¾ in.; modern Devanāgarī writing; eleven lines in a page.

A fragment of the *Liṅgapurāṇa*, very carelessly written, reaching from I., 115*a*, 2 to II., 6*b*, 4 in the preceding MS. It contains all after *adhy.* 71 of the first part, and breaks off in *adhy.* 3 of the second part.

[Dr. John Taylor.]

3578.

1301 c. Foll. 27; size 12½ in. by 5¾ in.; careless Devanāgarī writing of the latter part of last century; 10–15 lines in a page.

Rāmasahasranāma-stotram, or *Rāmanāmasahasrakam*, a collection of a thousand names and epithets of *Rāma*, in 127 *ślokas*, professing to form part of the *Liṅgapurāṇa*; with a commentary (*vivṛiti*), explaining the origin and reason of the names, by *Maheśvara*, pupil of *Svayamprakāśa-tīrtha*. The MS. is very incorrect.

The text begins (somewhat corrected): ईश्वर उवाच ॥

अथ वक्ष्यामि भो देवि रामनामसहस्रकं ।
शृणु चैकमनाः स्तोत्रं गुह्याद्गुह्यतरं परं ॥ १ ॥
राजीवलोचनः श्रीमान् श्रीरामो रघुपुंगवः ।
रामभद्रः सदाचारो [राजे]द्रो* जानकीपतिः ॥ २ ॥
अग्रगण्यो [वरेण्य]श्च† वरदः परमेश्वरः ।
जनार्दनो जितामित्रः परार्थैकप्रयोजनः ॥ ३ ॥

---

* Neither this word nor सदाचार is explained in the commentary.

† वियते लक्ष्या ऽपि पतित्वेनेति वरेण्यः वृञयण्यो बाहुलकात्कर्मणि(!) । comm.

Digitized by Microsoft®

विश्वामित्रप्रियो दांतः शत्रुजिच्छत्रुतापनः ।
सर्वज्ञः सर्वदेवादिः शरण्यो बालिमर्दनः ॥ ४ ॥ °

It ends:

श्रीशः शरण्यो भूतानां संश्रिताभीष्टदायकः ।
अनंतः श्रीपतौ रामो गुणभृन्निर्गुणो महान् ॥ १२० ॥ °
मातृहा पितृहा चैव भ्रूणहा वीरहा तथा ।
कोटिकोटिसहस्राणि हायनानि [च] यान्यपि ॥ १२६ ॥
संवत्सरं क्रमाज्जह्यात्प्रत्यहं गुरुसंनिधौ ।
निकलंकः सुखं भुक्त्वा ततो मोक्षमवाप्नुयात् ॥ १२७ ॥

इति श्रीलिंगपुराणे श्रीरामसहस्रनामस्तोत्रं संपूर्णं ॥

The commentary begins:

स्वयंप्रकाशतीर्थाग्रिलब्धवेदांतिसत्पदः ।
महादेवो विवृणुते रामनामसहस्रकम् ॥

ईश्वर इत्यादि । ईष्टे इतीश्वरः । स्येशभासपिसकसो वरच् । संकोचकस्योपपदादेरभावात् सर्वेश्वरो महादेवः ॥ अथशब्दो मंगलार्थः श्रुत्या । तदुक्तं । ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कंठं भित्त्वा विनिर्यातौ तस्मान्मांगलिकावुभाविति ॥ °

It ends (on *śl.* 120; the last seven verses not being commented upon): श्रीभागवते ऽपि । नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्यमुख्या (?) इति गुणाभाव उक्त एव । व्यावहारिकगुणानामनंतत्वात्कल्याणरूपत्वाच्चानंतकल्याणगुणविशिष्टत्वेन भक्तैर्ध्येयः स्तुत्यो ऽर्च्यश्च ।

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ।
अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥

इति नवविधा भक्तिरप्येवं संगच्छत एव । नवविधभक्तिनिरूपणं विस्तरभिया ऽत्र नोच्यते ॥ १२० ॥ इति श्रीश्रीरामसहस्रनाम्नां कृता विवृतिः समाप्ता ॥

[H. T. COLEBROOKE.]

3579.

1111. Foll. 362; size 12½ in. by 6 in.; fair, modern Devanāgarī writing; twelve lines in a page.

Varāhapurāṇa, or *Vārāhapurāṇa*, as it is called in these MSS.

It begins: नारायणं नमस्कृत्य ° ॥ १ ॥

नमस्तस्मै वराहाय लीलयोद्धरते महीं ।
खुरमध्यगतो यस्य मेरुः खणखणायते ॥ २ ॥ °

For an analysis of the work see Aufrecht, Cat. Bodl., no. 105. The work has been published, in the Bibl. Ind., by *Paṇḍit Hṛishīkeśa Śāstrī*. [H. T. COLEBROOKE.]

3580.

2777. Foll. 390 (counted 389, no. 337 being double); size 11¾ in. by 6¾ in.; fair Devanāgarī writing of 1785 A.D.; thirteen lines in a page.

Vārāhapurāṇa, a less accurate MS.

[COLL. OF FORT WILLIAM.]

3581.

1766. Foll. 86; size 8 in. by 3¾ in.; legibly written, in Devanāgarī, in 1758 A.D.(?); foll. 1–4 by a different hand from the rest; 9–11 lines in a page.

Veṅkaṭagiri-māhātmya—or, in the Sanskritized form used here, *Vyaṅkaṭagirimāhātmya*—in 30 *adhyāyas*; assigning itself to the *Vārāhapurāṇa*, apparently for the sole reason that *Vishṇu*, in the boar-*avatāra*, after lifting the earth with his tusk from hell, sent out *Garuḍa* to fetch the hill to the glorification of which this *Māhātmya* is devoted.

It begins:

श्रीमद्वराहरूपस्य नमस्कृत्य वसुंधरा * ।
उद्धृता येन पातालाद्वासार्थं सर्वदेहिनां ॥ १ ॥

---

* ?श्रीमद्वराहरूपाय नमः कृत्वा वसुंधरा । In the Madras ed. (1884) of the *Veṅkaṭācalamāhātmya*, a collection of *Paurāṇik* treatises relating to this locality, our treatise begins: श्रीमते भूवराहाय नमः कृत्वा वसुंधरा । ° this verse being followed by the following additional one: नमो यज्ञवराहाय कृष्णाय शतबाहवे । नमस्ते वेदवेदान्तवपुषे विश्वरूपिणे ॥

Digitized by Microsoft®

मुनय ऊचुः ॥

भगवन् सूत धर्मज्ञ वेदव्यासकृपानिधे ।
विष्णोः स्थानेषु दिव्येषु (सर्वेषु ed.) स्वयंव्यक्तस्थलेषु च [॥ २ ॥

यत्र विष्णोरतिप्रीतिर्यत्र पश्यंति (सिध्यन्ति ed.) सिद्धयः ।
सत्यद्रुतं च चारित्रं यत्र विष्णोः प्रवर्तते ॥ ३ ॥

मनुष्याणां च वसतां यत्र सिद्धो(दृश्यो ed.) भवेद्धरिः* ।
अस्माकं ब्रूहि यच्छ्रुत्वा श्रोतव्यं नावशिष्यते ॥ ४ ॥

इति पृष्टस्तदा सूतस्तपोध्यानसमाधिमान् † ॥ ५ ॥

सूत उवाच ॥

अहो पृष्टमपूर्वं यत्कौतुकं भवतामहो ।
ममापि वांछा महती वक्तुं तत्तु वदामि वः ॥ ६ ॥

शृणुध्वं मुनयो यूयं सावधानतया हि वै ।
क्रीडारसेषु सक्तस्य हरेः क्रीडासमन्वितं ॥ ७ ॥

विविधैस्तस्य चारित्रैरुपेतं सर्वसिद्धिदं ।
सर्वैश्वर्यप्रदं (० करं ed.) नृणां सर्वाश्चर्यसमन्वितं (० प्रदं [शुभं ed.) ॥ ८ ॥

पुण्यं पवित्रमायुष्यं सर्वमंगलकारकं ।
वराहकल्पवृत्तांतं (वा० ed.) शेषाचलसमाश्रयं ॥ ९ ॥

पुरा हि सागरैः सर्वैरेकीभूते महार्णवे (महीजले ed.) ।
कल्पादौ भगवान्विष्णुर्वटपत्रसमाश्रयः ॥ १० ॥

महर्लोकं समाश्रित्य तिष्ठंतं जलसंप्लवे (स्थितं च जलसं- [प्लवं ed.) ।
विचिंत्य युगसाहस्रं जलावस्थानमद्भुतं ॥ ११ ॥

यथापूर्वं जगत्सृष्टुमुद्युक्तः सर्वशक्तिमान् ॥ १२ ॥ °

Regarding the site of the hill, or range of hills, in the district of North Arcot, we meet with the following description of the spot where *Vishṇu* awaits the return of the bird, fol. 6*b*:

गते तु गरुडे तस्मिन्नानेतुं पर्वतोत्तमं ।
पोत्री रूपी (*r.* पोत्रिरूपी) हरिर्भूमिं स्थापयित्वा तु पूर्व- [वत् ॥
पद्भ्यां भूमिं परिक्रम्य गौतमीतीरमागतः ।
तस्यास्तु दक्षिणे भागे षष्टियोजनदूरतः ॥
पूर्वोद्धृते पश्चिमे भागे पंचभिर्योजनैर्युते ।
देशे पुण्यजनाकीर्णे रुक्मनद्यास्तयोत्तरे ॥
आगत्य तस्थौ देवो ऽपि गरुडागमनोन्मुखः ।
वैनतेयो ऽपि परमं गत्वा धाम ददर्श ह ॥

There it is where *Vishṇu*, in the shape of *Śvetavarāha*, establishes his throne and disports himself with *Ramā*, and where sacred shrines of great renown, such as the Svāmipushkariṇī-tīrtha, spring up, which make the whole neighbourhood a favourite place of pilgrimage.

Many names for Vyaṅkaṭagiri or Vyaṅkaṭādri, or different hills of this mountainous district, are given on foll. 10–12, such as *Śeshaśaila, Nārāyaṇagiri, Vaikunṭhādri, Siṃhācala, Añjanādri, Varāhādri, Nīlagiri, Śrīnivāsagiri, Ānandādri.* As *Vyaṅkaṭeśa* or *Vyaṅkaṭanāyaka, Vishṇu* is adored under 800 different forms of his name (foll. 80–82).

An etymology of the Sanskritized form of the Tamil name *Veṅkaṭa* is proposed on fol. 12*a* from *va* = *amṛitavīja* and *kaṭa* = *aiśvarya*. Of the two ranges of hills, the northern and the southern, put down under that name in Winslow's Tamil Dictionary, it is to the former, "called *Tirupati* (the Tamil for *Śrīpati*) and sacred to *Vishṇu*," that the object of this work corresponds. The indigenous form *Veṅkaṭādri* only occurs once in the text (fol. 10*a*, l. 7).

It ends:

इति स्तुतस्ततः प्राह सूतश्चेदं वचस्तदा ।
व्यासस्यानुग्रहादेव वेद्मि तत्त्वं तपोधनाः ॥
व्यंकटाचलमाहात्म्यं कल्पकोटिशतैरपि ।
वक्तुं न शक्यं वदनैः शेषेणापि सहस्रकैः ॥
उक्तं तथापि माहात्म्यं कीर्तितं किंचिदेव हि ।
पुण्यं पवित्रं माहात्म्यमिदमुक्तं मयानघाः ॥
यः पठेत्प्रयतो भक्त्या शृणुयाद्वा लिखेदपि ।
सर्वान्कामानवाप्नोति स प्राप्नोति च मंगलं ॥

* The Mad. ed. here inserts: श्रवणानन्दजनको वृत्तान्तो यस्य वा भवेत् ॥ तादृशं वैष्णवं क्षेत्रमद्भुतं प्रियदर्शनम् ॥

† ध्यात्वा मुहूर्तमात्रं तु प्रोवाच मुनिसत्तमान् ॥ ed.

Digitized by Microsoft ®

इति श्रीमद्वाराहपुराणे व्यंकटगिरिमाहात्म्ये सूतशौनकसंवादे त्रिंशो ऽध्यायः ॥ ० ॥ वाणैर्ऋनिशाकरे वसुशशीश्वेतन्मिते चान्द्रके पौषे कृष्णतिथौ च रुद्रविमले लिखितं चिरं पुस्तकं ॥

A different work of the same title, in seven *adhyāyas*, was published, at Madras, in 1886.

[H. T. COLEBROOKE.]

3582.

1425. Foll. 343; size 12¼ in. by 5 in.; fairly written, in Devanāgarī (at Agra), in 1589 A.D.; eleven lines in a page.

Vahnipurāṇa [A], also called *Āgneyapurāṇa*, or *Agnipurāṇa*, though different from the work usually designated by that title.

The first leaf has been supplied by a more modern, rather incorrect, hand. A number of leaves must have been missing before the present pagination was supplied.

It begins (somewhat corrected, at the beginning, with the help of the other MS.):

तेजोमयानामन्योन्यमेकस्मिन्विविधात्मनाम् ।
भेदे विभिन्नता पुंसां त्रयाणामस्तु वः श्रिये ॥

व्यास उवाच ॥

ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति ।
पृषदाज्यसमुत्पन्नः सूतः पौराणिको द्विजः ॥

वक्ता वेदादिशास्त्राणां त्रिकालामलतत्त्ववित् ।
तीर्थयात्राप्रसंगेन नैमिषारण्यमागमत् ॥

तं दृष्ट्वा नैमिषीयास्तु ऋषयो दग्धकिल्बिषाः ।
समभ्यर्च्य यथान्यायं पप्रच्छुः स्म कुतूहलात् ॥

ऋषय ऊचुः ॥

कर्तव्या तीर्थयात्रास्मिन् लोके केन कथं द्विजैः ।
श्रोतुं त इतदिच्छामो वद बहुमता मुने ॥

सूत उवाच ॥

इतच्छ्रुत्वा ततः सूतः पुराणो मुनिसत्तमः ।
प्रोवाच तान् मुनिश्रेष्ठान् स्वधर्मं शृणुतानघाः ॥

यज्ञाधिकारे च गते द्विजेंद्रः
सर्वस्वनाशे क्षितिपो ऽथ वैश्यः ।
शुश्रूषणायां बलवीर्यहीनः
शूद्रस्तु तीर्थानि भजेत्सुदांतः ॥

मुमुक्षुभिस्तीर्थगतिर्मुनींद्रैः
कार्या तथा तत्फलकांक्षिभिश्च ।
तां ब्रह्मचारी विधिवत्करोति
स्वयं यतो गुरुणा संनियुक्तः ॥

नित्यं गृहस्थाश्रमसंस्थितस्य
मनीषिभिस्तीर्थगतिर्निषिद्धा ।
मातुः पितुर्भक्तिमना गृहस्थ-
सुतो न कुर्यात्खलु तीर्थयात्राम् ॥

गंगाजलेनानुदिनं मनुष्यो
मृन्मोमयेनापि सदा मुनींद्राः ।
ज्ञातीह सम्यग्यदि भावशुद्धः
फलं तदाप्नोति न चान्यदेतत् ॥

सर्वाणि तीर्थानि हि यानि तानि
स्वर्गेंऽतरिक्षे ऽपि पुनः पृथिव्याम् ।
तुल्यानि सम्यग् मुनयो ऽग्निहोत्रे
पुंसो(सत्यं B) गृहस्थाश्रमसंस्थितस्य ॥

यस्येह यज्ञेष्वधिकारितास्ति
गृहे ऽन्वहं दानवतो मुनींद्राः ।
संशुद्धतः कल्कविवर्जितस्य
तीर्थैं गतिर्धर्मपरैर्निषिद्धा(गतिः पूर्वतरै० B) ॥

यत्पुण्यमुक्तं मुनिभिः पृथिव्यां
दानोपवासे सततं द्विजेभ्यः ।
सर्वं तदाप्नोति न संशयो ऽत्र
जुह्वत्स्वकाले यदि वाग्निहोत्रैः(०त्रौ B) ॥

संजुह्वतो ब्राह्मणसत्तमस्य न विद्यते पापमथो दुरुक्तम् ।
भुक्त्वा दिवं ब्रह्मपदं प्रयाति सुरेप्सितं ब्राह्मणकर्मसंस्थः ॥

अधीत्य वेदान्(अधीतवेदः B) सुरकार्यहेतोर्
इष्ट्वा मखान्याप्य विमुक्तदेहः ।
स्वधर्मसंस्थो विषयैर्विरक्तः
सुतैजसं ब्रह्मपदं प्रयाति ॥

यस्मात्पदात्सर्वपदं हि विश्वम्
उत्पद्यते क्वापि लयं न याति(प्रयाति B) ।
विप्रस्तमाप्नोति स्वधर्मसंस्थः
स्वधासु जुह्वत्स्वधया वसूनि ॥

Digitized by Microsoft®

ऋषय ऊचुः ॥

यथा चोत्पद्यते विश्वं ब्रह्मांडं सचराचरम् ।
यस्माच्च तत्पुनर्याति लयं यत्र प्रतिष्ठितम् ॥

श्रुतमस्माभिरेतद्धि यथाप्रश्नं(यथादृष्टं B) स्वयंभुवः ।
श्रोतुमिच्छामहे त्वेव(त्वत्तः B) पुराणमग्निसंज्ञितम् ॥

सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ।
वंशानुचरितं चैव पुराणं पंचलक्षणम् ॥

अग्निर्नो देवता सूर्यो द्विजानां लोमहर्षण(०णे B) ।
प्रत्यक्षं हि प्रमाणानां नित्यं वेदेषु गीयते ॥

उदु त्यं जातवेदसं देवं वहंति केतवः ।
दृशे विश्वाय सूर्यं हि देवाः सर्वे व्यवस्थिताः ॥

तस्युषो जगतश्चात्मा वह्निरंते प्रतिष्ठितः(यच्चिरं वेधनि-
तस्मात्सत्यं च मोक्षश्च देवानामपि देवता ॥ [स्थितः B) ।

येन त्यक्तं जगत्सर्वं सदेवासुरमानवम् ।
सहसा नाशमायाति यथा मृद्भाजनं जले ॥

वह्नेस्तु त्रिविधा शक्तिः सर्गसंहृतिपालने ।
अस्माभिः संभूता(संभृता B; ?संहूता) देवाः स्वं स्वं
[धाम उपासते ॥

तस्मात्ततो ऽग्निसूर्याभ्यां यदुक्तमिति निश्चयः ।
पुराणं धर्मसकलं तद् ब्रूहि त्वं यथातथम् ॥

आद्ये महापुराणे आग्नेये प्रश्ननामाध्यायः ॥

सूत उवाच ॥

श्रूयतामभिधास्यामि प्रश्नं वो मुनिसत्तमाः ।
कथयामि पुराणस्य विषयं सर्वशास्त्रतः ॥

पुराणानां हि सर्वेषामिदं साधारणं स्मृतम् ।
पुराग्निर्भृगुणा शप्तः कस्मिंश्चित्कारणांतरे ।
क्रुद्धेन रभसा त्वं हि सर्वभक्षत्वमेष्यसि ॥

तस्मान्माहेश्वरं तेजः स्कन्नमग्नौ गतं ततः ।
तत्सर्वभक्षो भगवान्न तं दग्धुं तदक्षयम् ॥

तेनासीदतितेजस्वी भगवान् हव्यवाहनः ।
जगाम हिमवच्छैलं यत्र गंगावहत्सरित् ॥

स गंगामुपसंगम्य मुमोचाहूय तां नदीं ।
गर्भमायांतं दिव्यं सा भास्करोपमतेजसम् ॥

अथ गंगापि तं गर्भमसहंती तु धारणे ।
उत्ससर्ज गिरौ तस्मिन् हिमवत्परमार्चिते ॥

स तत्र वर्चसा लोकानादृत्य ज्वलनात्मजः ।
तस्थौ तं स्वसुतं दृष्ट्वा ज्वलनो ऽतिरुषान्वितः ॥

ययावंतर्हिमवंतं (सद्यः) समादृत्य स्वकां तनुं ।
ततो वह्नौ गते सर्वे त्रैलोक्यं सचराचरम् ॥

निष्प्रभं सहसा चासीद् हा हा भूतमचेतनम् ।
नो भांति चाग्निहोत्राणि देवाः सर्वे सवासवाः ॥

तथा रुद्रगणाः सर्वे चंद्रसूर्यादयो ग्रहाः ।
ततो देवाः सगंधर्वा ऋषयो मुनिसत्तमाः ॥

ब्रह्माणमुपसंगम्य इदं वचनमब्रुवन् ।
प्रसीद भगवन् वह्नेः शापश्चैव निवर्त्यताम् ॥

स मुखं सर्वदेवानां पितॄणां यक्षरक्षसां ।
तन्मुखादीरिते(?०देयते A) ऽग्नौ मुनि ब्रह्मन् कथं
प्रजाक्षये वयं क्षीणा होमदानक्रिया विना । [हविः ॥
तथैव नो लोकगुरो प्रसादं कर्तुमर्हसि ॥ ०

Vahni is subsequently prevailed upon by *Brahman* and the other gods; whereupon *Brahman's* son, *Marīci*, together with the *Munis* and *Ṛishis*, engages in a twelve years' course of sacrifice, during which time he elicits from *Vahni* all the information regarding religious observances, which forms the first, or ritualistic part of this *Purāṇa*.

The chapters (*adhyāya*) are not numbered, the following being those actually named:—
1. *ṛishipraśnaḥ*, fol. 2*b*; 2. *agnistavaḥ*, fol. 4*b*; 3. *brahmastutiḥ*, fol. 8*a*; 4. *snānavidhiḥ*, fol. 11*a*; 5. *āhnikasnānavidhiḥ*, fol. 14*b*; 6. *bhojanavidhiḥ*, fol. 20*a*; 7. *āgnikatapas*, fol. 20*b*; 8. (*veṇukathā*) *āśvamedhikaḥ*, fol. 23*b*; 9. *pṛithor upākhyānam*, fol. 26*a*; 10. *gāyatrīkalpaḥ*, fol. 29*b*; 11. *brāhmaṇapraśaṃsā*, fol. 31*b*; 12. *sargānuśāsanam*, fol. 33*a*; 13. *gaṇabhedaḥ*, fol. 37*a*; 14. *yoganirṇayaḥ*, fol. 40*b*; 15. *sarvakathanam*, fol. 45*b*; 16. *sargānukīrtanam*, *satīdehatyāgaḥ*, fol. 49*b*; 17. *varasargaḥ*, fol. 52*a*; 18. *kāśyapīyaprajāsargaḥ*, fol. 56*b*; 19. *kāśyapīyavaṃśaḥ*, fol. 63*b*; 20. *prajāpatisarga*, fol. 65*b*; 21–23. *varāhaprādurbhāvaḥ*, foll. (68*a*), 69*b*, 74*b*; 24–27. *narasiṃhaprādurbhāvaḥ*, foll. 76*b*, 79*b*, 82*b*, 85*a*; 28. *devāmbarīshasaṃvādaḥ*,

Digitized by Microsoft ®

fol. 88*b*; 29. *vaishṇavadharme yugānukīrtanam*, fol. 91*b*; 30. *vaishṇavadharme kriyāyogavidhiḥ*, fol. 93*b*; 31. *vaishṇavadharme śuddhivratam*, fol. 97*b*; 32. *sunāmadvādaśī*, fol. 101*b* (B, 100*b*); [After fol. 101 there seems to be a lacuna (appearing also, it seems, in an old, obliterated pagination). MS. B has here the following chapters: 33–35. *dhenumāhātmyam*, foll. 102*a*, 103*b*; 36. *ghṛitadhenuvidhi*, fol. 107*a*; 37. *vṛishadānam*, fol. 109*a*; 38. *pāśupatadānam*, fol. 113*a*;] 39. *pāpanāśanavṛishadānam*, fol. 104*a* (B, 115*a*); 40. *bhadranidhidānam*, fol. 105*b*; 41. *śivikādānam*, fol. 107*a*; 42. *vidyādānam*, fol. 108*a*; 43. *gṛihadānam*, fol. 109*b*; 44. *dāsīdānam*, fol. 110*a*; 45. *brāhmaṇakathanam*, fol. 110*b*; 46. *annadānam*, fol. 112*b*; 47. *pretopākhyānam*, fol. 114*b*; 48. *dīpamālikāsthāpanam*, fol. 115*b*; 49. *cyavananahushasaṃvādaḥ*, fol. 117*b*; 50. *tulāpurushadānam*, fol. 118*b*; 51. *śarmilopākhyānam*, fol. 121*b*; 52. *kanyādānam*, fol. 123*a*; 53. *taḍāgavṛikshapraśaṃsā*, fol. 124*a*; 54. *dānādiyajñakaraṇam*, fol. 126*b* (B, 139*a*); 55. *vāruṇārāmapratishṭhā*, fol. 130*a*; 56–60. *vāmanaprādurbhāvaḥ*, foll. 131*b*, 134*a*, 135*b*, 137*a*, 138*b* (ends fol. 142*a* in B, where a large lacuna must occur, comprising *adhys.* 56–59, and part of 55 & 60); 61. *kriyāyogaḥ*, fol. 141*a*; 62. (*kāma-*)*dhenupradānam*, fol. 144*b*; 63. *mudgalopākhyānam*, fol. 146*b*; 64. *śiver upākhyānam*, fol. 149*a*; 65. *dānāvasthā*(*nirṇayaḥ*), fol. 150*b*; 66. *saṃgrāmapraśaṃsā*, fol. 151*b*; 67. *rohiṇyā ashṭamīkalpaḥ*, fol. 157*a*; 68. *vaivasvatānukīrtanam*, fol. 159*a*; 69. *sagaropākhyānam*, fol. 163*a*; 70, 71. *gaṅgāvatāraḥ*, foll. 164*b*, 166*b*; 72. *gaṅgāmāhātmyam*, fol. 167*b*; 73, 74. *sūryavaṃśakīrtanam*, foll. 169*a*, 170*a* (B, 173*a*, 174*a*).

At the end of this last chapter there is the following marginal note by Colebrooke: 'The remainder of the *Purāṇa* seems to be an addition by another hand. The subject of it is *Rāma*.'

